राज्यस्तरीयसंस्कृतप्रतियोगितासु महाविद्यालयस्य विजयः

प्रतियोगितायोजकसंस्था – भाषा एवं संस्कृतिविभागः, हिमाचलप्रदेशः

विजेतृसंस्था – सनातनधर्म-आदर्शसंस्कृतमहाविद्यालः, डोहगी, ऊना, हि.प्र.

दिनाङ्कः – 28.08.2026

हिमाचलप्रदेशस्य भाषासंस्कृतिविभागेन त्रिगर्तसंस्कृतमहाविद्यालये, चामुण्डाजीधाम्नि आयोजितासु राज्यस्तरीयासु प्रतियोगितासु महाविद्यालयस्य विद्यार्थिभिः विविधस्पर्धासु भागम् ऊढ्वा उत्कृष्टाः उपलब्धयः प्राप्ताः ।

❖ **पुरस्कारभाजः छात्राः**

1. **सुश्री सोहानी** (शास्त्रि-पञ्चमसत्रार्धम्) - **प्रथमपुरस्कारः** (प्रश्नोत्तरीप्रतियोगिता)
2. **सुश्री तमन्ना** (शास्त्रि-पञ्चमसत्रार्धम्) - **द्वितीयपुरस्कारः** (प्रश्नोत्तरीप्रतियोगिता)
3. **सुश्री अनुराधा** (शास्त्रि-पञ्चमसत्रार्धम्) - **द्वितीयपुरस्कारः** (श्लोकोच्चारणप्रतियोगिता)

❖ **प्रशंसाभाजः छात्राः**

1. **सुश्री नेहा** (शास्त्रि-तृतीयसत्रार्धम्) (भाषण-अनुवादप्रतियोगिता)
2. **श्री विनायक गर्ग** (शास्त्रि-पञ्चमसत्रार्धम्) (भाषण-अनुवादप्रतियोगिता)
3. **श्री राघव शर्मा** (शास्त्रि-तृतीयसत्रार्धम्) (श्लोकोच्चारणप्रतियोगिता)

❖ **छात्रदलमार्गदर्शकः - डा. मुकेशकुमारः (सहायकाचार्यः, ज्योतिषविभागः)**

राज्यस्तरीयप्रतियोगिताभ्यः प्रत्यागतानां विजेतृणां सम्माननाय अभिनन्दनाय च महाविद्यालये विशेषकार्यक्रमः आयोजितः । अस्मिन्नवसरे महाविद्यालयस्य **प्राचार्यः प्रो. लालसिंहपठानिया** विजेतृविद्यार्थिनां सम्मानं कुर्वन् अवादीत् यत् **निरन्तरं परिश्रमेण अनुशासिताः छात्राः आचार्याणां मार्गदर्शनेन निश्चयेन स्वलक्ष्यं प्राप्तुं शक्नुवन्ति ।**

अभिनन्दनकार्यक्रमे महाविद्यालयस्य **सर्वेऽपि आचार्याः– डा. केदारदत्तपुरोहितः, डा. रविदत्तशर्मा, डा. राजिन्द्रकुमारशर्मा, डा. कृष्णादेवी, डा. नरेन्द्रकुमारः, डा. बिक्रमबाद्यकरः, श्री रविकन्यालः, श्री विपिनपटयालः, डा. अरुणादेवी, डा. महेशशर्मा, सुश्री अनीता रानी, श्रीमती कपिला पुरोहित, श्रीमती अञ्जु कुमारी, श्रीमती पूजा शर्मा, श्री विजयः, श्री राजेशः, श्रीमती रीता, श्री अनुजः** तथा अन्ये प्राध्यापकाः, कर्मचारिणः एवं विद्यार्थिनः उपस्थिताः आसन् ।

विजेतारः छात्राः

राज्यस्तरीयसंस्कृतप्रतियोगितासु डोहगी-महाविद्यालयस्य उत्कृष्टप्रदर्शनम्

त्रयः विद्यार्थिनः प्रथम-द्वितीयपुरस्कारैः सम्मानिताः, प्राचार्येण कृतं सम्माननम्

डा. मुकेशकुमारः (डोहगी, ऊना) डोहगीस्थस्य सनातनधर्म-आदर्शसंस्कृतमहाविद्यालयस्य विद्यार्थिभिः राज्यस्तरीयासु संस्कृतप्रतियोगितासु उत्कृष्टप्रदर्शनं विधाय महाविद्यालयस्य गौरवं वर्धितं वर्तते। हिमाचलप्रदेशस्य भाषासंस्कृतिविभागस्य सौजन्येन त्रिगर्तसंस्कृतमहाविद्यालये, चामुण्डाजीधाम्नि आयोजितासु राज्यस्तरीयासु प्रतियोगितासु महाविद्यालयस्य विद्यार्थिभिः विविधस्पर्धासु भागम् ऊढ्वा उत्कृष्टाः उपलब्धयः प्राप्ताः।

शास्त्री-तृतीयवर्षस्य छात्रा सोहानी प्रश्नोत्तरी-प्रतियोगितायां प्रथमपुरस्कारं, तमन्ना प्रश्नोत्तरी-प्रतियोगितायां द्वितीयपुरस्कारं, तथा अनुराधा श्लोकोच्चारण-प्रतियोगितायां द्वितीयपुरस्कारं प्राप्तवत्यः। एतदतिरिच्य महाविद्यालयस्य छात्रौ विनायकगर्गः नेहा च भाषणप्रतियोगितायां, राघवशर्मा च श्लोकोच्चारणप्रतियोगितायां उत्कृष्टं प्रदर्शनं कृतवन्तः। विद्यार्थिनां साफल्येन महाविद्यालये हर्षोल्लासस्य वातावरणं वर्तते। राज्यस्तरीयप्रतियोगिताभ्यः प्रत्यागतानां विजेतृणां सम्मानाय अभिनन्दनाय च महाविद्यालये विशेषः कार्यक्रमः आयोजितः। अस्मिन्नवसरे महाविद्यालयस्य प्राचार्यः प्रो. लालसिंहपठानिया विजेतृविद्यार्थिनां सम्मानं कृतवान्।

प्राचार्यः अकथयत् यत् विद्यार्थिभिः राज्यस्तरीयायां प्रतियोगितायां प्राप्तम् इदं साफल्यं महाविद्यालयस्य गौरवाय वर्तते। सः उक्तवान् यत् निरन्तरं परिश्रमेण अनुशासिता छात्राः आचार्याणां मार्गदर्शनेन निश्चयेन स्वलक्ष्यं प्राप्तुं शक्नुवन्ति। सः अन्यान् विद्यार्थिनः अपि एताभिः उपलब्धिभिः प्रेरणां गृहीत्वा विविधासु प्रतियोगितासु उत्साहपूर्वकं भागं ग्रहीतुं सम्प्रेरितवान्। विद्यार्थिनां मार्गदर्शकेन ज्योतिषविभागस्य आचार्येण डा. मुकेशकुमारशर्मणा अपि विद्यार्थिनां सफलतायै हार्दिकाः शुभकामनाः प्रदत्ताः। अभिनन्दनकार्यक्रमे महाविद्यालयस्य सर्वेऽपि आचार्याः— डा. केदारदत्तपुरोहितः, डा. रविदत्त-शर्मा, डा. राजिन्द्रकुमारशर्मा, डा. कृष्णादेवी, डा. नरेन्द्रकुमारः, श्री रविकन्यालः, श्री विपिनपटियालः, डा. विक्रमबाद्यकरः, डा. अरुणादेवी, डा. महेशशर्मा, सुश्री अनीता, श्रीमती कपिलापुरोहित, श्रीमती अञ्जु, श्रीमती पूजा, श्री विजयः, श्री राजेशः, श्रीमती रीता, श्री अनुजः तथा अन्ये प्राध्यापकाः, कर्मचारिणः एवं विद्यार्थिनः उपस्थिताः आसन्। सर्वैः विजेतृविद्यार्थिनाम् उत्साहवर्धनं कृत्वा तेषां उज्ज्वलभविष्याय शुभकामनाः प्रदत्ताः। राज्यस्तरीयासु संस्कृतप्रतियोगितासु प्राप्ताभिः एताभिः उपलब्धिभिः महाविद्यालयस्य शैक्षणिक-सांस्कृतिकक्रियाकलापेषु नूतना ऊर्जा सञ्चारिता।

संस्कृत प्रतियोगिताओं में डोहगी महाविद्यालय का शानदार प्रदर्शन

चम्बा एक्सप्रेस। बंगाणा

सनातन धर्म आदर्श संस्कृत महाविद्यालय, डोहगी के विद्यार्थियों ने राज्यस्तरीय संस्कृत प्रतियोगिताओं में शानदार प्रदर्शन करते हुए महाविद्यालय का नाम रोशन किया। भाषा एवं संस्कृति विभाग, हिमाचल प्रदेश के सौजन्य से त्रिगर्त संस्कृत महाविद्यालय, चामुण्डाजी धाम, कांगड़ा में आयोजित राज्यस्तरीय प्रतियोगिताओं में महाविद्यालय के विद्यार्थियों ने विभिन्न स्पर्धाओं में भाग लेकर उत्कृष्ट उपलब्धियां प्राप्त कीं। शास्त्री तृतीय वर्ष की छात्रा सोहानी ने प्रश्नोत्तरी प्रतियोगिता में प्रथम पुरस्कार, तमन्ना ने प्रश्नोत्तरी प्रतियोगिता में द्वितीय पुरस्कार तथा अनुराधा ने श्लोकोच्चारण प्रतियोगिता में द्वितीय पुरस्कार प्राप्त किया। इनके अलावा महाविद्यालय के छात्रों विनायक गर्ग व नेहा ने भाषण प्रतियोगिता तथा राघव शर्मा ने श्लोकोच्चारण प्रतियोगिता में उत्तम प्रदर्शन किया विद्यार्थियों की इस सफलता से महाविद्यालय परिवार में हर्ष का वातावरण है। राज्यस्तरीय प्रतियोगिताओं से लौटने पर महाविद्यालय में विजेता विद्यार्थियों के सम्मान एवं अभिनन्दन के लिए विशेष कार्यक्रम आयोजित किया गया। इस अवसर पर महाविद्यालय के प्राचार्य प्रो. लालसिंह पठानिया ने विजेता विद्यार्थियों को सम्मानित करते हुए उन्हें हार्दिक बधाई दी। उन्होंने कहा कि विद्यार्थियों द्वारा राज्यस्तरीय प्रतियोगिता में प्राप्त यह सफलता महाविद्यालय के लिए गौरव का विषय है। निरन्तर परिश्रम, अनुशासन और आचार्यों के मार्गदर्शन से विद्यार्थी अपने लक्ष्य को प्राप्त कर सकते हैं। उन्होंने अन्य विद्यार्थियों को भी इन उपलब्धियों से प्रेरणा लेकर विभिन्न प्रतियोगिताओं में बढ़-चढ़कर भाग लेने का आह्वान किया। विद्यार्थियों के मार्गदर्शक ज्योतिषविभाग के आचार्य डा. मुकेश कुमार शर्मा ने भी विद्यार्थियों की इस सफलता के लिए बधाई एवं शुभकामनाएँ दी गई। अभिनन्दन कार्यक्रम में महाविद्यालय के समस्त आचार्यगण डा. केदारदत्तपुरोहित डा. रविदत्तशर्मा, डा. राजिन्द्र कुमार शर्मा, डा. कृष्णा देवी, डा. नरेन्द्र कुमार, रवि कन्याल, विपिन पटियाल, डा. विक्रम बाद्यकर, डा. अरुणा देवी, डा. महेश शर्मा, अनीता, कपिला पुरोहित, अंजु, पूजा, विजय, राजेश, रीता, अनुज व अन्य प्राध्यापक कर्मचारी व विद्यार्थी उपस्थित रहे। सभी ने विजेता विद्यार्थियों का उत्साहवर्धन करते हुए उनके उज्ज्वल भविष्य की कामना की। राज्यस्तरीय प्रतियोगिताओं में प्राप्त इन उपलब्धियों ने महाविद्यालय की शैक्षणिक एवं सांस्कृतिक गतिविधियों को नई ऊर्जा प्रदान की है।